MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

तर्कसंग्रहे प्रमाणविचारः – एकमध्ययनम्

Dr. Pinki Das
Assistant Professor
Department of Sanskrit
Purnidevi Chowdhury Girls' College

सारांशः

न्यायमते बुद्धिस्तु आत्मनः गुणपदार्थः। ज्ञानं बुद्धिश्च अस्मिन् दर्शने समार्थकौ। ज्ञानं वस्तु प्रकाशयति। प्रदीपः यथा स्वतन्त्ररूपेण अस्तित्वशीलं वस्तु प्रकाशयति, तथैव ज्ञानं स्वतन्त्रभावेन अस्तित्वयुक्तं पदार्थं प्रकाशयति। पदार्थरूपेण जगतः वस्तुसमुदायः ज्ञान-निरपेक्षः। ज्ञानप्रसंगे आत्मा ज्ञातृरूपेण, पदार्थः विषयरूपेण, मन-इन्द्रियादिश्च करणरूपेण चीयन्ते।

न्यायदर्शने यथार्थानुभवस्य ज्ञाता प्रमाता, ज्ञानं प्रमा, ज्ञानस्य विषयः प्रमेयः, ज्ञानस्य करणं प्रमाणम् इति उच्यते। न्यायमते आत्मा एव ज्ञाता। ज्ञानम् आत्मन आगन्तुको गुणः। नौयायिकाः यथार्थानुभवस्य प्रमायाः वा, चत्वारः प्रमाणानि स्वीकृतवन्तः। तानि यथा- प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दश्च।

न्याय-वैशेषिकदर्शनं समानतन्त्रम्। फलतः विविधेषु ग्रन्थेषु न्याय-वैशेषिकदर्शनतत्त्वम् एकत्रैव आलोचितमस्ति। आचार्योदयनकालात् (10th century AD) उभयोः दर्शनतत्त्वयोः समन्वयः भवति। तर्कसंग्रहे आचार्यान्नंभट्टेन न्याय-वैशेषिकाभिमतेषु यत्र ऐक्यमत्यमस्ति तत्र कस्यचिदेकस्य मतस्य उल्लेखनं कृतमस्ति। प्रमाणभेदविषयेऽपि तस्य अन्यथा न भवति इति परिलक्ष्य "तर्कसंग्रहे प्रमाणविचारः" इत्यस्य शीर्षकस्य शोधपत्रमिदमत्र प्रस्तूयते।


कूटशब्दाः - तर्कसंग्रहः, न्यायबोधिनी, परामर्शज्ञानम्, उपमितिः, व्याप्तिः, सादृश्यज्ञानम् इत्यादयः।

न्यायवैशेषिकनये बुद्धिस्तु चतुर्विंशतिषु गुणेषु षोऽशतमः। उक्तं च तर्कसंग्रहकृता- 'सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानमिति'।[i]

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

बुद्धिलक्षणस्य अर्थस्तु एवम् - यः पदार्थः सर्वविधो व्यवहारे हेतुर्भवति तद्गुणस्वरूप-पदार्थो बुद्धिरित्युच्यते। सा बुद्धिर्हि ज्ञानमिति। लक्षणे हेतुशब्दद्वारा सर्वविधव्यवहारे ज्ञानम् असाधारणं कारणम् भवति तदुक्तम्। बुद्धिलक्षणे ज्ञानशब्द द्वारा ज्ञानत्वजातिर्हि ज्ञानलक्षणम् इत्युच्यते। ज्ञानत्वजातेरस्तित्वं प्रमाणयितुं दीपिकायामुक्तम्- 'जानामीत्यनुव्यवसायगम्यज्ञानत्वं लक्षणमित्यर्थः।'[ii] न्यायवैशेषिकमतेन ज्ञानमात्मगुण एव। तच्च तृतीय क्षणवृत्तिध्वंसप्रतियोगिऽपि ज्ञानम् अव्याप्यवृत्ति च, तेन यस्मिन् आत्मनि ज्ञानास्तित्वम् तस्मिन् आत्मनि ज्ञानाभावोऽपि। आत्मनि इत्यनेन शरीरावच्छिन्न आत्मनि इत्युच्यते। ज्ञानेन हि विषयस्य प्रकाशो भवति, व्यवहारयोग्यतापि। सर्वेषां जीवानां ज्ञानादनन्तरम् अनुव्यवसायो भवति। इन्द्रियविषयसन्निकर्षात् आदौ यत् ज्ञानमुत्पद्यते 'अयं घटः' इत्यादि रूपम् तच्च व्यवसायरूपम्। तदनन्तरम् 'अहं घटमिमम् जानामि' अथवा एतद् घटज्ञानवान् अहम्' इत्याकारं यत् ज्ञानं तद् अनुव्यवसाय इत्युच्यते, तेन यदुक्तं दीपिकाकारेण – जानामीत्यनुव्यवसायज्ञानत्वमित्यादि तद् व्याख्यातम्। ज्ञानस्य सर्वव्यवहारो हेतुत्वम् अपि अविसंवादित्वम्।

बुद्धिः द्विविधा। यदुक्तं ग्रन्थकारेण- स्मृतिरनुभवश्च। तत्र संस्कारमात्रजन्यं ज्ञानं स्मृतिः।[iii] स संस्कारो भावनाख्यः।[iv] तेन यज् ज्ञानं संस्कारमात्रजन्यं अर्थात् यज ज्ञानोत्पत्तौ संस्कार एव कारणं, चक्षुः आदि वहिरिन्द्रियं न, तज् ज्ञानं हि स्मृतिः। स्मृतिभिन्नं ज्ञानम् अनुभवः। सोऽनुभवः द्विविधः, यथार्थायथार्थश्चेति। उक्तं च अन्नंभट्टेन- तद्वति तत्प्रकारकः अनुभवः यथार्थः। यथा- 'रज्जुते इदं रजतमिति ज्ञानम्।'[v] यथार्थानुभवः प्रमा इति उच्यते।[vi]



MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

"प्रमाकरणं प्रमाणम्।" अर्थात् प्रमायाः करणम् हि प्रमाणम्। प्रमा यदि कार्यं भवति तर्हि तस्य प्रमाकार्यस्य कारणम् अवश्यमेव भवति। कार्यस्यैकस्य कारणानि वहुनि भवितुम् अर्हन्ति। परन्तु विविधेषु कारणेषु यद् असाधारणं कारणं तदेव करणम्। यत् कारणं सर्वशेषे उपस्थितः सन् कार्योत्पादनं सम्पन्नं करोति तद् एव करणमिति विषयस्य ज्ञाने ज्ञाता, सचेतनता, युक्ति, इन्द्रिय, विषयस्यऽयोगरूपाणि विविधानि कारणानि सन्ति। परन्तु, इन्द्रिय विषयोः योग एव करणं भवति, यस्मादेव संश्लिष्टज्ञानं सम्भवति। अतः ज्ञानस्य उत्सः प्रमाणम् इति। पदार्थस्य यथार्थज्ञानलाभार्थं प्रमाणस्य गुरुत्वम् अनस्वीकार्यम्।[vii] प्रमाणं विना यथार्थ ज्ञानलाभं न सम्भाव्यते। प्रमाणेन यथा भावपदार्थस्य प्रकाशं सम्भवति तथा अभावपदार्थस्य प्रकाशमपि।[viii] अतः भावपदार्थस्य अभावपदार्थस्य च ज्ञानस्य जनकः प्रमाणम् इति।

नैयायिकैः यथार्थानुभवस्य प्रमायाश्च चत्वारः प्रमाणाः स्वीकृताः।[ix] यथा- प्रत्यक्षप्रमाणम्, उपमानप्रमाणम्, अनुमानप्रमाणम् शब्दप्रमाणम् इति। उक्तं यथा न्यायवोधिनीकृता- तत्करणमिति। फलीभूतप्रत्यक्षादिकरणं चतुर्विधमित्यर्थः। प्रत्यक्षादिचतुर्विधप्रमानानां प्रमाकरणत्वं सामान्यलक्षणम्।[x]

ज्ञानस्य उत्पत्तिप्रक्रिया


प्रत्यक्षः - ज्ञाता (आत्मा)- मनः इन्द्रियम्- विषयः (पदार्थः)- (फलम्) प्रत्यक्षज्ञानम्।

अनुमानम्- ज्ञाता (आत्मा)- मनः इन्द्रियम्- व्याप्तिज्ञानम् – विषयः – (फलं) अनुमितिः।

उपमानम् – ज्ञाता (आत्मा)- मनः- इन्द्रियम् – सादृश्यज्ञानम्-विषयः-(फलं) उपमितिः।

शब्दः- ज्ञाता (आत्मा)– मनः – इन्द्रियं – पदज्ञानं – विषयः – (फलं) शाब्दः।

ज्ञानस्य विभागः



MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

यथार्थ प्रत्यक्षप्रमा	भ्रम-तर्क-संशयेत्यादि
यथार्थ अनुमितिः	अयथार्थः प्रत्यक्षश्च
यथार्थ उपमितिः	अयथार्थ अनुमितिः,
यथार्थ शाब्दबोधः	अयथार्थ शाब्दबोधश्च

प्रत्यक्षप्रमाणम् - प्रत्यक्षशब्दस्य आभिधानिकोऽर्थः 'दर्शणम्'। दार्शनिकदृष्टिभङ्ग्या प्रत्यक्षशब्दस्य त्रयः अर्थाः सन्ति। यथा- 'प्रत्यक्षज्ञानम्'(प्रमा), 'प्रत्यक्षं प्रमाणम्'(ज्ञानस्य उत्सः), 'प्रत्यक्षः (ज्ञानस्य विषयः)घटः'। "प्रत्यक्षम् – प्रति अक्षम्। प्रति – विषयं प्रति, अक्षम् इन्द्रियम्।" प्रत्यक्षसम्बन्धे उक्तं यत् – "विषयं प्रति गतम् इन्द्रियं यस्मै प्रयोजनाय तत् प्रत्यक्षम्।" अतः अत्र प्रत्यक्ष इत्युक्ते वोध्यते यत् इन्द्रियद्वारा प्रत्यक्षप्रमा प्रत्यक्षज्ञानं वा। अतः प्रथम व्युत्पत्त्यानुसारेण प्रत्यक्षं - प्रत्यक्ष प्रमा प्रमिति वा। प्रत्यक्ष शब्दस्य द्वितीयव्युत्पत्तिः यथा- प्रति विषयं प्रति गतम्, 'विषय सन्निकृष्टम् इन्द्रियम्'। इन्द्रियं विषयं प्रति प्रयोजनाय गच्छति। इदं ज्ञानलाभं इन्द्रियार्थसन्निकर्षेण सम्भवति। अतः अत्र प्रत्यक्षमित्युक्ते प्रत्यक्षज्ञानस्य करणम्। असाधारण कारणं व्यापारं वा अववोध्यते। प्रत्यक्षम् - प्रत्यक्षप्रमायाः करणम् प्रमाणम् वा इति। तृतीयव्युत्पत्त्यनुसारेण प्रत्यक्षशब्दस्य अर्थः 'प्रति यं विषयं' प्रति गतम् अक्षम्। अर्थात्, इन्द्रियं यं विषयं प्रति गमनं करोति, स विषयः एव प्रत्यक्षविषयः। अतः अत्र प्रत्यक्षम्- विषयः अर्थः वा इति।

अतः प्रत्यक्षशब्दः त्रिषु अर्थेषु व्यवहृयते। यथा- प्रत्यक्षज्ञानं प्रमिति वा प्रत्यक्षप्रमाणं प्रत्यक्षविषयश्च। परन्तु अन्नंभट्टेन प्रत्यक्षं द्वयोः अर्थयोः प्रयुज्यते। यथा- 1) प्रमिति अर्थे 2) प्रमाणार्थे च। अन्नंभट्टेन प्रत्यक्षप्रमाणस्य लक्षणमुक्तं यथा- "प्रत्यक्षज्ञानकरणं प्रत्यक्षम्"।[xi] संक्षेपेण वक्तुं शक्यते प्रत्यक्षप्रमाणस्य लक्षणम्- प्रत्यक्षज्ञानकरणत्वमिति। अर्थात्, प्रत्यक्षज्ञानस्य यत् करणम् तदेव प्रत्यक्षप्रमाणम्। अत्र उल्लेख्यं यद्, कारणेषु यद् असाधारणं कारणं तदेव करणम्। नव्यमतानुसारेण, 'व्यापारवत् कारणं करणम्।'[xii] अर्थात्, यत् कारणं व्यापारविशिष्टं तदेव करणम्। द्रव्यान्यत्वे सति तज्जन्यते सति तज्जन्यजनकः इति व्यापारलक्षणम्। अर्थात् द्रव्यभिन्नं यः पदार्थः कस्यापि कारणस्य कार्य्यं भूत्वा, तस्य कारणस्य कार्य्यमुत्पद्यते स एव व्यापार इति। यथा- कुठारेण वृक्षच्छेदनकार्ये कुठारः कारणं, छेदनं

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

कार्य्यं, कुठारसंयोगः व्यापारगश्च। कुठारसंयोगस्य कारणं कुठारः, परन्तु कुठारसंयोगेन वृक्षच्छेदनं भवति। संयोगः न द्रव्यपदार्थः। कुठारसंयोगः कुठारस्य कार्य्यम् भूत्वा पुनः कुठारस्य कार्य्यं वृक्षच्छेदनम् उत्पद्यते। अस्मिन् उदाहरणे संयोगव्यापारः कुठारे अवस्थितत्वात् वृक्षच्छेदनरूपकार्यं प्रति कुठारः करणम्। यतः व्यापारवत् कारणं करणम्। तथैव घटकार्य्यं प्रति भ्रमणादिव्यापारः दण्डे स्थितत्वात् दण्डं घटकार्य्यस्य करणं भवति। अनेन रूपेण यत् कारणं व्यापारविशिष्टं भवति, तदेव करणमिति परिगण्यते।

प्राचीनानां मतं भिन्नं भवति। तैरुच्यते- व्यापार एव करणम्, न तु व्यापारविशिष्टम्। यथा उपरोक्तोदाहरणद्वये दण्ड सत्त्वेपि यदि भ्रमणं विलम्बितं भवति तर्हि घटकार्य्यं न उत्पद्यते। कुठार सत्त्वेपि यदि संयोगः विलम्बितं भवति तर्हि वृक्षच्छेदनकार्य्यं, न समुत्पद्यते इति। अत्र भ्रमण-संयोगरूप व्यापार एव करणम्। अतः अन्यकारणसत्त्वेपि यत् कारणं प्रकृतस्तु कार्यमुत्पन्नं करोति तत् कारणं करणम् इति। उच्यते यत्- फलायोगव्यवच्छिन्नं कारणं करणम्।[xiii] प्रत्यक्षस्थले अन्नंभट्टेन नव्यनैयामिकस्याभिमतं स्वीकृतम्। यथा-

चक्षुरिन्द्रियं – इन्द्रियसंयोगः – घटः (चाक्षुष प्रत्यक्षप्रमा)

(व्याप्यारवत्) (व्यापारः) (विषयः)

चाक्षुषप्रत्यक्षप्रमायाः करणं चक्षुरिन्द्रियम् इति।

प्रत्यक्षप्रमाणं व्यापारविशिष्टं सन् प्रत्यक्षज्ञानस्य करणरूपेण कार्य्यं करोति। प्रत्यक्षज्ञानकरणं षडविधम्। यथा- चक्षुरिन्द्रियं, कर्णेन्द्रियं, नासिकेन्द्रियं, जिह्वेन्द्रियं, त्वगिन्द्रियं, मनसेन्द्रियं च। अतः प्रत्यक्षप्रमा षड्विधाः – यथा

1) चक्षुरिन्द्रियेण पटप्रत्यक्षे चाक्षुषप्रत्यक्षप्रमा।
2) कर्णेन्द्रियेण वज्रनिनादश्रवणे श्रावणप्रत्यक्षप्रमा।
3) नासिकेन्द्रियेण पुष्पगन्धघ्राणे घ्राणजप्रत्यक्षप्रमा।
4) जिह्वेन्द्रियेण मिष्टरसास्वादने रासनप्रत्यक्षप्रमा।

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

5) त्वगिन्द्रियेण शीतलजलस्पर्शे त्वाच्प्रत्यक्षप्रमा।

6) मनसेन्द्रियेण सुखादिप्रत्यक्षे मानसप्रत्यक्षप्रमा।

अतः इन्द्रियद्वारा प्रत्यक्षप्रमा उत्पद्यते। इन्द्रियं तस्य करणम्। अतः इन्द्रियम् एव प्रत्यक्षप्रमाणम्। यथा-

1) चाक्षुसप्रत्यक्षप्रमायाः करणम् चक्षुरिन्द्रियम्।

2) श्रावण प्रत्यक्षप्रमायाः करणं कर्णेन्द्रियम्

3) घ्राणजप्रत्यक्षप्रमायाः करणं नासिकेन्द्रियम्।

4) रासनप्रत्यक्षप्रमायाः करणं जिह्वेन्द्रियम्।

5) त्वाच् प्रत्यक्षप्रमायाः करणं त्वगिन्द्रियम्

6) मानसप्रत्यक्षप्रमायाः करणं मनसेन्द्रियम्। इति।

अनुमानप्रमाणम् – अन्नंभट्टेन स्वीकृतेषु प्रमाणचतुष्टयेषु द्वितीयं प्रमाणम् अनुमानम्। अनुमानम्=अनु+मानम्। 'अनु' शब्दस्य अर्थः पश्चात्, मानम् शब्दस्य अर्थः ज्ञानम्। अनुपूर्वकं 'मा' धातोः परं करणार्थे अनट् प्रत्ययेन 'अनुमानम्' इति शब्दः निषपद्यते। एकस्माद् ज्ञानादनन्तरं यत् ज्ञानं लभते तत् अनुमानप्रमाणज्ञानम् इति उच्यते। यत् प्रमाणं अन्यैकस्माद् प्रमानाद् परं कार्यकरं भवति तत् प्रमाणं अनुमानप्रमाणम् इति कथ्यते। अत्र अन्यैकं प्रमाणम् इत्युक्ते प्रत्यक्षप्रमाणम् अववोध्यते। प्रत्यक्षप्रमाणादनन्तरं यत् प्रमाणं व्यवह्रियते तत् अनुमानप्रमाणम्। अनुमानप्रमाणाद् प्राप्तज्ञानम् अनुमिति इति। यत् यथार्थानुमितेः करणं तद् अनुमानम्। उक्तं यत् तर्कसंग्रहकृता- अनुमितिकरणमनुमानम्।[xiv] अर्थात्, अनुमितेः करणं, असाधारणं कारणं वा अनुमानम् इति।[xv]

प्रत्यक्षप्रमाणेन यत्र धूम अस्ति तत्रैव वह्निरस्ति इति ज्ञानं लभते। अत्र धूमः व्याप्यः वह्निः व्यापकश्च। प्रत्यक्षप्रमाणाद् प्राप्तेन अनेन व्याप्तिज्ञानेन पर्वते धूमं प्रत्यक्षं कृत्वा एतत् सिद्धान्तमुपाद्यते यत् "पर्वतो वह्निमान्' इति। पर्वते वह्नेरस्तित्वं प्रत्यक्षं न कृत्वाऽपि धूम वह्न्याः अविच्छेद्यसम्पर्कज्ञानात् व्याप्तिज्ञानाद् वा पर्वतो वह्निमान् इति सिद्धान्तमुपनीयते।

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

अनुमान प्रमाणस्य फलम् अनुमानप्रमा अनुमितिः वा। प्रत्यक्षप्रमाणात् ज्ञानलाभादनन्तरं तज्ज्ञानमवलम्ब्य किमपि नवीनज्ञानं प्रतीयते तजज्ञानं अनुमितिः। अनुमितेर्लक्षणमुक्तम् अन्नंभट्टेन- 'परामर्शजन्यं ज्ञानम् अनुमितिः।[xvi] अनुमितिस्थले ग्रन्थकारेण प्राचीननैयायिकस्याभितं स्वीकृतम्। प्राचीननैयायिकानां मतेन- "फलायोगव्यवच्छिन्नं स्वीकृतम्। प्राचीननैयायिकानां मतेन- "फलायोगव्यवच्छिन्नं कारणं करणम्।" अर्थात् व्यापार एव करणम्। नव्यनैयायिकानां मतेन- "व्यापारवत् कारणं करणम्"। अर्थात् व्यापारविशिष्टं कारणम् एव करणम्। व्यापारवत् कारणं करणम् स्वीकृते सति अनुमितेः करणं भवति व्याप्तिरिति।[xvii] किन्तु व्यापार एव करणं गृह्यते सति अनुमितेः करणं भवति परामर्शः इति। परन्तु अन्नंभट्टेन परामर्शम् अनुमितेः करणरूपेण निर्दिश्यते। अतः अनुमितिस्थले ग्रन्थकारेण प्राचीननैयायिकानां मतं स्वीकृतम्, इति स्वष्टीयते।

परामर्शात् यत् ज्ञानम् उत्पद्यते तत् अनुमितिज्ञानम्। इत्यस्मिन् लक्षणे अतिव्याप्तिदोषस्य सम्भावना अस्ति। यथा- अस्पष्टालोके दूरस्थितं दीर्घाकारं किमपि वस्तू दृष्ट्वा कोऽपि एतत् वक्तुं शक्यते यद् 'अयं स्थाणुर्वा पुरुषो वा' परन्तु विशेषदर्शनादनन्तरं यदि एतदुक्तं अयं पुरुषो'- ज्ञानमिदं तु परामर्शजनितम्। अस्य ज्ञानस्य परामर्शो भवति- "पुरुषत्वव्याप्यहस्तपदादिमान् अयम्"। अतः अयं पुरुषो' इदं ज्ञानं परामर्शजन्यम्। परन्तु एतत् न अनुमानज्ञानम्, एतत् तु प्रत्यक्षज्ञानम् इति। अत्र इन्द्रियार्थसन्निकर्षं विद्यते। अनेन अन्नंभट्टेन प्रमाणीकृतम्, परामर्शः केवलं अनुमितिं न उत्पन्नं करोति संशयानन्तरं प्रत्यक्षज्ञानमपि परामर्शादेव जायते। अतः यदि एतदुच्यते परामर्शाद् उत्पन्नज्ञानम् अनुमितिः तर्हि अनुमितेः लक्षणम् अवश्यमेव अतिव्याप्तिदोषेन दुष्टं भविष्यति। यतः संशयादनन्तरं प्रत्यक्षज्ञानमपि अनुमितौ अन्तर्भवति। अतिव्याप्तिदोषवारणाय अन्नंभट्टेन विकल्पलक्षणं कृतम्। तेन परामर्शेन सह पक्षतापदं प्रयुक्तम्। अस्पष्टालोके अयं स्थानुर्वा पुरुषो वा इति संशये, संशयानन्तरं अवश्यमेव अयं पुरुषः, इति ज्ञानं प्रत्यक्षं परामर्शजनितं च। परन्तु अस्मिन्ज्ञाने पक्षता नास्ति। किन्तु अनुमानप्रमायां यथा परामर्शः अस्ति तथैव पक्षताऽपि वर्तते। अतः परामर्शः पक्षताश्च अनुमितेः लक्षणम्। अनेन अतिव्याप्तिदोषस्य सम्भावना नास्ति। अतः अन्नंभट्टेन उक्तम्- "पक्षताजन्यत्वपरामर्शजन्यत्वोभयवत्त्वम् अनुमितित्वम।" [xviii]

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

अनुमानस्य निदर्शनम्-

यत्र धूमः तत्र वह्निः, यथा (महानसः)

पर्वतः धूमवान् (उपनयम्)

पर्वतः वह्निमान् (सिद्धान्तः निगमनं वा)

अत्र अनुमानस्य निगमने पर्वतः पक्षः, वह्निः साध्यः, धूमः हेतुः। पक्षता (पक्ष+ता) अस्यार्थः पक्षस्य धर्मः। अस्मिन् अनुमाने पर्वते वह्नेरस्तित्वं पक्षे साध्यस्यास्तित्वं वा प्रमाण्यते। यदि पक्षे साध्यः निश्चितः भवति तर्हि तत्र अनुमिति र्न जायते। पर्वते वह्नेरस्तित्वं पूर्वमेव प्रत्यक्षी कृते सति तत्र धूमः दृष्ट्वा पर्वते वह्निरस्ति इति अनुमानं भवितुं न शक्यते। पक्षे साध्यस्य निश्चितज्ञानं अनुमितेः प्रतिवन्धकः इति उच्यते। किन्तु पक्षे साध्यस्य निश्चितज्ञानसत्त्वेपि यदि अनुमितिसाधनस्य इच्छा वर्तते तर्हि तत्र अनुमितिः भवति। प्रतिवन्धकसत्त्वेपि यः कार्यमुत्पन्नं करोति स उत्तेजकः इति कथ्यते। अनुमितिस्थले साध्यस्य निश्चितज्ञानं प्रतिबन्धकम् अनुमितेः साधनस्य इच्छा (सिषाधयिषा) उत्तेजिकाश्च। काष्ठेन वह्निः प्रज्वलितो भवति। किन्तु काष्ठेन सह चन्द्रकान्तमणौ उपस्थिते सति दहनकार्यं न भवति। यतः चन्द्रकान्तमणिः अग्निप्रज्वलनस्य प्रतिवन्धिका इति। परन्तु चन्द्रकान्तमणिः स्थित्वेऽपि सूर्यकान्तमणेः साहचर्यं वर्तते तर्हि अग्निदहनं भवति। अत्र चन्द्रकान्तमणिः प्रतिबन्धिका, सूर्यकान्तमणिः उत्तेजिकाश्च। अनेनरूपेण अनुमितिस्थले पक्षे साध्यस्य निश्चितज्ञानं चन्द्रकान्तमणितुल्यं प्रतिबन्धकम्। सिषाधयिषा सूर्यकान्तमणितुल्यं उत्तेजकं च। (उत्तेजकत्वम्-प्रतिबन्धक-समकालीन-कार्यजनकत्वम्)। उत्तेजकस्य अभावविशिष्टं प्रतिबन्धकस्याभावम् अग्निप्रज्वलनरूपकार्यस्य कारणरूपेण स्वीक्रियते। तथैव अनुमितिस्थलेऽपि। सिषाधयिषाविरहसहकृत् सिद्धभावं पक्षतां वा अनुमितेः कारणरूपेण प्रतिपाद्यते।[xix]

काष्ठम् – प्रतिबन्धकम् / उत्तेजकम् अभावः (पक्षता) - अग्निप्रज्वलनम्

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

व्याप्तिज्ञानम्- परामर्शज्ञानम् - सिद्धिः > अभावः (पक्षता) – पर्वतो वह्निमान्
सिषाधयिषा

नैयायिकानां मतेन परामर्शज्ञानाद् भिन्नम् अनुमिति न सम्भाव्यते। व्याप्तिज्ञानं पक्षधर्मताज्ञानं च परामर्शज्ञानस्य विषयः भवति। उक्तं च अन्नंभट्टेन- व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। परन्तु प्राभाकरमीमांसकाः अद्वैतवेदान्तदार्शनिकाः बौद्धदार्शनिकाः च परामर्शज्ञानं न स्वीकुर्वन्ति। नैयायिकैः मन्यन्ते यत् पक्षधर्मताज्ञानेन व्याप्ति ज्ञानेन च अनुमितिज्ञानं न प्राप्यते। 'पर्वतः धूमवान्' इति पक्षधर्मताज्ञाने धूमः प्रकारकर, पर्वतः विशेष्यश्च धूमनिष्ठ वह्निः इत्येवं रूपं किमपि व्याप्तिज्ञानं अत्र विषयः न भवति। अत्र विषयस्तु धूमः। अन्यस्मिन् दिशायां, 'वह्निव्याप्यधूमः' इति स्मरणात्मके व्याप्तिज्ञाने पर्वतः न विषयः। पक्षरूपेण पर्वतः अत्र अनुपस्थितः। संक्षिप्ततया वक्तुं शक्यते, पक्षधर्मताज्ञाने व्याप्तेः उपस्थितिर्नास्ति, व्याप्तिज्ञाने च पक्षस्य उपस्थितिः नास्ति। तस्मात् अन्नंभट्टेन मन्यते, 'वह्नि-धूम' व्याप्तिज्ञानं 'पर्वतधूमवान्' पक्षधर्मताज्ञानं च न युज्यते चेत् अनुमिति र्न सम्भाव्यते। व्याप्तिज्ञानं पक्षधर्मताज्ञानं च परस्परं योजनाय 'परामर्शज्ञानस्य' प्रयोजनमस्ति। उक्तं च अन्नंभट्टेन- "व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा- वह्निव्याप्यधूमवानयं पर्वतः इति ज्ञानं परामर्शः।" अतः परामर्शज्ञानात् अनुमिति प्राप्तौ न काऽपि वाधा अस्ति। यदुच्यते ग्रन्थकृता अन्नंभट्टेन- "तज्जन्यं (परामर्शजन्यं) पर्वतो वह्निमान् इति ज्ञानमनुमितिः।"[xx] अनुमितिस्थले अन्नंभट्टेन व्यापारार्थे "फलायोगव्यवच्छिन्नं कारणं करणम्' अर्थात् परामर्शम् अनुमिते, करणरूपेण प्रतिष्ठितम् इति। 'व्यापार एव कारणम्' इति प्राचीननैयायिकानामभिमत ग्रन्थकारेण स्वीकृतम्।

व्याप्तिज्ञानम् - परामर्शज्ञानम् - अनुमिति

(व्यापारवत्) (व्यापारः)

करणम्

उपमानप्रमाणम् –

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

नैयायिकदर्शने तृतीयप्रमाणम् उपमानम्। तर्कसंग्रहे अन्नंभट्टेन उक्तम्- "उपमितिकरणमुपमानम्। संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः। तत्कारणं सादृश्यज्ञानम्।"[xxi] 'उपमानम्' इति शब्दे द्वौ शब्दौ वर्तेते। 'उप' इत्यस्यार्थः सादृश्यम्। 'मानम्' इति शब्दस्यार्थः ज्ञानम् इति। न्यायदर्शने 'उपमिति' शब्दस्यार्थः संज्ञासंज्ञिसम्बन्धविषयज्ञानम्। उपमितेः करणम् उपमानम्। अत्र संज्ञा शब्दस्यार्थः 'पदम्', संज्ञी शब्दस्यार्थः च अर्थः इति। अतः पदेन सह अर्थस्य यः सम्बन्ध तदेव वाच्यत्वम् इति उच्यते। उपमितिज्ञानं वाच्यत्वप्रकारकज्ञानम्।[xxii] परन्तु ग्रन्थकारेण उपमितेः यत्लक्षणमुक्तं तत् व्यवहारसाधकमात्रम् तस्मात्, नीलकण्ठीटीकायाम् उच्यते यत्- "अहम् उपमानं करोमि" इत्येवं रूपम् अनुव्यवसायगम्युपमितित्वं प्रकृत (उपमितेः इतरव्यावर्त्तकं) लक्षणम्।[xxiii]

निदर्शनरूपेण ग्रन्थकारेण उक्तम्- तथाहि कश्चिद्गवयशब्दवाच्यमजाननं कुतश्चिदारण्यकपरुषाद् गोसदृशो गवयः इति श्रुत्वा वनं गतो, वाक्यार्थं स्मरणं गोसदृशं पिण्डं पश्यति। तदनन्तरं अयं गवयशब्दवाच्यः इत्युपमितिरुत्पद्यते।[xxiv] इत्युपमानम्। अत्र गवयशब्दः संज्ञा। गोसदृशप्राणी संज्ञी च। अन्नंभट्टेन प्रदत्तम् उदाहरणं विश्लेषणेन दृश्यते यत् अत्र उपमिति- अयं गवयशब्दवाच्यम्। अयम् उपमितिज्ञानलाभार्थं निम्नलिखितानि स्तरानि अतिक्रमणीयानि। यथा -

क) 'गो सदृशो गवयः' – इति अतिदेशवाक्यम्।

ख) अरण्ये गोसदृशं पिण्डं प्रत्यक्षं कृतम्।

ग) पिण्डं प्रत्यक्षानन्तरं ज्ञानं भवति यत्, एतत् गोसदृशमिति।

घ) अतिदेशवाक्यस्मरणम्।

ङ) निश्चितसिद्धान्तः भवति-अयं गवयरिति।

अनेन उपमितिज्ञानं सम्भाव्यते। अतः अतिदेशवाक्यम् अनुसृत्य वास्तवाभिज्ञतामाध्यमेन यत् निश्चयज्ञानमुत्पद्यते तदेव उपमितिज्ञानम् उपमितिज्ञानात् पूर्वं ज्ञानद्वयम् अवश्यमेव प्रयोजनीयम्- क) सादृश्यज्ञानम् ख)

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

अतिदेशवाक्यार्थज्ञानम् च। अनयोः उपमितेः करणं किम्? – अस्मिन् विषये प्राचीननैयायिकैः मन्यन्ते अतिदेशवाक्यार्थस्मरणम् एव उपमितेः करणम्, सादृश्यज्ञानं च उपमितेः सहकारीकारणम्। परन्तु नव्यनैयायिकैः उक्तं- सादृश्यज्ञानम् एव उपमितिज्ञानस्य करणम्, अतिदेशवाक्यार्थस्मरणं च सहकारीकारणम् इति। अन्नंभट्टेन नव्यनैयायिकानाम् अभिमतम् अङ्गीकृत्य उक्तं यत्- सादृश्यज्ञानम् उपमितेः करणम्। उपमानस्य विभाजनसम्बन्धे सिद्धान्तचन्द्रोदये उल्लिख्यते यत् उपमानं त्रिविधम्।[xxv] यथा- 1) सादृश्यविशिष्टपिण्डज्ञानम् 2) असाधारणधर्मविशिष्टं पिण्डज्ञानम् 3) वैधर्म्यविशिष्टपिण्डज्ञानं च। सादृश्यविशिष्ट-उपमाने वस्तुद्वयस्य सादृश्येन उपमितिज्ञानं लभते। यथा- गो सदृशो गवय इति। असाधारणधर्मविशिष्टोपमाने वस्तोः असाधारणधर्मेण उपमितिज्ञानं सम्भाव्यते। यथा- कस्यापि वृहदाकारस्य जन्तवः नासिकोपरि शृङ्गं प्रत्यक्षं कृत्वा पिण्डमयं गण्डारपदवाच्यमिति समाधीयते। वैधर्म्यविशिष्टोपमाने वस्तुद्वयस्य वैधर्म्यवैशिष्टेन उपमितिज्ञानं प्राप्यते। यथा- गोः द्विशफत्वम्, किन्तु अश्वः एकशफत्वम्। उभयोः शफत्ववैधर्म्यस्य अतिदेशं प्राप्य यदि कोऽपि अश्वं सनाक्तं करोति, तर्हि तस्य उपमितिज्ञानस्य करणं भवति वैधर्म्यविशिष्टमुपमानम् इति।

शब्दप्रमाणम् - नैयायिकाः शब्दं एकं पृथक्प्रमाणम् इति कथयन्ति। अन्नंभट्टेनापि शब्दं प्रमाणरूपेण उल्लिख्य तर्कसंग्रहे उक्तं यत्- 'आप्तवाक्यं शब्दः'। आप्तस्तु यथार्थवक्ता, वाच्यं पदसमूहः यथा गाम् आनय इति।[xxvi] अर्थात् आप्तवचनमेव शब्दप्रमाणम्। अतः अनाप्तवचनं न शब्दप्रमाणम्। अनाप्तम् इतुक्ते भ्रम-प्रमाद- विप्रलिप्सा इत्यादि दोषयुक्तम्। भ्रमादि दोषमुक्तम् आप्तकथनं यथार्थज्ञानलाभस्य उत्सः। शब्दप्रमाणात् प्राप्तं यथार्थज्ञानं शाब्दवोधः इति उच्यते। शव्दप्रमाणसम्बन्धे गौतमहोदयेन उक्तम्- 'आप्तोपदेशः शब्दः'।[xxvii] गौतमाचार्यम् अनुसृत्य अन्नंभट्टेन उक्तम्- 'आप्तवाक्यं शव्दः'। चार्वाक्-वौद्ध-वैशेषिकदर्शनेषु शब्दप्रमाणं न स्वीकृतम्। किन्तु जैन-सांख्य-वेदान्त-मीमांसा-न्यायदर्शनानि शब्दम् एकं स्वतन्त्रप्रमाणरूपेण स्वीकुर्वन्ति।

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

तर्कसंग्रहकारेण अन्नंभट्टेन वाक्यार्थज्ञानस्य कारणमुच्यते यत्- "आकाङ्क्षायोग्यता-सन्निधिश्च वाक्यार्थज्ञाने हेतुः।"[xxviii] अस्य वाक्यस्य व्याख्यायां उच्यते- "अत्र च कारेण तात्पर्यग्रहः"। पुनः, ग्रन्थकारेण दीपिकायामुक्तम्- वाक्यार्थज्ञानस्य कारणं आकाङ्क्षाज्ञानं, योग्यताज्ञानं, सन्निधिज्ञानं, तात्पर्यज्ञानं च। परन्तु शाब्दबोधे एतत् सर्वं सहकारिकारणम् इति। शाब्दबोधस्य करण व्यापारविषये च न्यायबोधिनी टीकायां उच्यते यत्- "पदज्ञानं करणम्। वृत्तिज्ञानसहकृत-पदज्ञानजन्य-पदार्थोपस्थितः व्यापारः। वाक्यार्थज्ञानं शाब्दबोधः फलम्।"[xxix] इति।

पदज्ञानम् – वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिः - वाक्यार्थज्ञानम्
(व्यापारवत्) (व्यापारः) शाब्दबोधः वा।

अतः व्यापारवत् कारणं करणम् इति नव्यनैयायिकाना करणलक्षणम् अनुसृत्य अन्नंभट्टेन व्यापारविशिष्टं कारणं पदज्ञानं हि शाब्दबोधस्य करणरूपेण स्थिरीकृतम् इति।

प्रमा	करणम्	व्यापारः
प्रत्यक्षम्	इन्द्रियाणि (व्यापारवत्)	सन्निकर्षः
अनुमितिः	परामर्शः (व्यापारः)	परामर्शः
उपमितिः	सादृश्यज्ञानम् (व्यापार वत्)	अतिदेशवाक्यस्य स्मृतिः गो सदृशो गवय इति।
शाब्दबोधः	पदज्ञानम् (व्यापारवत्)	पदज्ञानजन्य पदार्थोपस्थितिः (स्मरणम्)

तर्कसंग्रहः मूलतः वैशेषिकानां ग्रन्थः। यतः वैशेषिकचिन्तनानुगुणम् अत्र प्रमाणकारणादयविषयाः गृहीताः सन्ति। यद्वा भवतु उदयनकालात् (10th century A.D.) न्यायवैशेषिकयोः समन्वयः घटितः। अतएव अत्र

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

न्यायशास्त्रस्य मतमपि सन्निविष्टमस्ति इति वक्तुं शक्यते। भारतीयदर्शनेषु सर्वाः परम्पराः प्रमाणस्य भेदान् समानरूपेण न स्वीकुर्वन्ति। किन्तु तर्कसंग्रहे न्यायवैशेषिकयोः मतम् समानमेव।

Endnotes

I. तर्कसंग्रहः, पृष्ठम् 81

II. तर्कसंग्रहदीपिका, पृष्ठम् 81

III. तर्कसंग्रहः, पृष्ठम् 81

IV. तर्कसंग्रहदीपिका, पृष्ठम् 81

V. तर्कसंग्रहः, पृष्ठम् 86

VI. यथार्थानुभवः प्रत्यक्षमेवेति चार्वाकाः। अनुमितिरपीति काणादवौद्धाः। उपमितिरपीति नैयायिकैकदेशिनः। शाब्दमपीति नैयायिकाः। अर्थापत्तिरपीति प्राभाकराः। आनुपलब्धिकोऽपीति भाट्टवेदान्तिनौ। सांभविकैतिह्यकावपीति पौराणिकाः चैष्टिकोऽपीति तान्त्रिकाः। एतेषां मतेऽस्वरसं संभाव्य तस्य चातुर्विध्यं स्पष्टं दर्शितम्। (तर्कसंग्रहः पृष्ठम् 29)

VII. 'प्रमाणं अर्थवत्', 'प्रमाणतोऽर्थप्रतिपत्तौ', "अर्थ वति च प्रमाणे प्रमाता प्रमेयं प्रमितिरित्यर्थवन्ति भवन्ति।" (तर्कसंग्रहः, पृष्ठम् 55)

VIII. "तदेवंशतः प्रकाशकं प्रमाणसदपि प्रकाशयतीति।" (तर्कसंग्रहः, पृष्ठम् 56)

IX. यथार्थानुभवश्चतुर्विधः। प्रत्यक्षानुमित्युपमितिशाब्दभेदात्।। तत्करणमपि चतुर्विधम्। प्रत्यक्षानुमानोपमानशब्दभेदात्" (तर्कसंग्रहः, पृष्ठम् 6)

X. तर्कसंग्रहन्यायवोधिनी, पृष्ठम् 41

XI. प्रमाभूतेषु प्रत्यक्षात्मकं यज्ज्ञानं चक्षुषादिप्रत्यक्षं तत्प्रति व्यापारवदसाधारणं कारणमिन्द्रियं भवति, अतः प्रत्यक्षज्ञानकरणत्वं प्रत्यक्षस्य लक्षणम्। (तर्कसंग्रहः, न्यायवोधिनी, पृष्ठम् 39)

XII. तर्कसंग्रहः, पृष्ठम् 102

XIII. तर्कसंग्रहः, पृष्ठम् 102

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

XIV. तर्कसंग्रहः, पृष्ठम् 59

XV. अनुमितिकरणत्वमनुमानस्य लक्षणम्। अनुमानं व्याप्तिज्ञानम्। एतस्य परामर्शरूपव्यापारद्वारा अनुमितिं प्रत्यसाधारणकरणतयानुमितिकरणत्वमुपन्नम्। (तर्कसंग्रहः, न्यायवोधिनी, पृष्ठम् 59)

XVI. परामर्शस्य व्याप्तिज्ञानज्यत्वाद् व्याप्तिज्ञानजन्यानुमितिजनकत्वात्तज्जन्यत्वे सति तज्जन्यजनकत्वरूपव्यापारत्वमुपपन्नम्। (तर्कसंग्रहः, पृष्ठम् 60)

XVII. यदुक्तं न्यायवोधिनाकायां – "अनुमितौ व्याप्तिज्ञानं करणम्, परामर्शः व्यापारः इति (तर्कसंग्रहः, न्यायबोधिनी, पृष्ठम् 55)

XVIII. 'संशयोत्तर प्रत्यक्षेऽतिव्याप्तिः, स्थाणु-पुरुषसंशयान्तरं "पुरुषत्वव्याप्यकरादिमानयम्" इति परामर्शे सति 'पुरुष एव' इति प्रत्यक्षजननात्। न च तत्र अनुमितिरेव इति वाच्यम्, "पुरुषं साक्षात् करोमि" इति अनुव्यवसायविरोधात् इति चेत्, न, पक्षतासहकृत परामर्शजन्यत्वस्य विवक्षितत्वादिति।" (तर्कसंग्रह, अनुमानपरिच्छेदः, पृष्ठम् 122)

XIX. सिषाधयिषा-विरह-सहकृत-सिद्ध्यभाव पक्षता। साध्यसिद्धिः अनुमितिप्रतिबन्धिका। सिद्धिसत्त्वेपि अनुमिनुयाम् इति इच्छायां अनुमितिदर्शनात् सिषाधयिषा उत्तेजिका। ततश्च उत्तेजकाभावविशिष्टमन्यभावस्य दाहकारणत्ववत् सिषाधयिषा विरह सहकृत सिद्ध्यभावस्यापि अनुमितिकारणत्वम्। (तर्कसंग्रहः, अनुमानपरिच्छेदः, पृष्ठम् 122)

XX. व्याप्तिविशिष्टं च तत् पक्षधर्मताज्ञानं चेति कर्मधारये विशिष्टपदस्य प्रकारतानिरूपकत्वार्थकत्वात्, पक्षधर्मताज्ञानमित्यत्र षष्ठ्या विषयत्ववोधनात्, धर्मतापदस्य सम्वन्धार्थकत्वाच्च, कर्मधारयसमासे समस्यमानपदार्थयोरभेदसंसर्गलाभेन च व्याप्तिप्रकारकाभिन्नं यत्पक्षसम्वन्धविषयकं ज्ञानं तत् परामर्श इति लभ्यते। एवं सति 'धूमो वह्निव्याप्यः आलोकवान्पर्वतः' इत्याकारकसमूहालम्वने परामर्शलक्षणमस्तीत्यतिव्याप्तिस्तद्वारणाय पक्षनिष्ठविशेष्यतानिरूपिता या हेतुनिष्ठाप्रकारता तन्निरूपिता या व्याप्तिनिष्ठा प्रकारता तच्छालिज्ञानं परामर्शः। एतादृशपरामर्शजन्यत्वे सति ज्ञानत्वमनुमितेर्लक्षणम्।" (तर्कसंग्रहः, न्यायवोधिनी, पृष्ठम् 61)

XXI. तर्कसंग्रहः, पृष्ठम् 209

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

XXII. संज्ञा च पदं संज्ञी चार्थस्तयोः सम्वन्धः वाच्यत्वं तत्प्रकारकः अयं गवयपदवाच्य इति ज्ञानमुपमितिरित्यर्थः (सिद्धान्त चन्द्रोदयः, तर्कसंग्रहः, उपमानखण्डम्, पृष्ठम् 209)

XXIII. "लक्षणं तु उपमिनोमीत्यनुव्यवसायगम्योपमितित्वमेव।" (तर्कसंग्रहः, पृष्ठम् 209)

XXIV. तर्कसंग्रहः, पृष्ठम् 209

XXV. तर्कसंग्रहः, पृष्ठम् 158

XXVI. तर्कसंग्रहः, पृष्ठम् 211

XXVII. तर्कसंग्रहः, पृष्ठम् 169

XXVIII. "पदस्य पदान्तरव्यतिरेकप्रयुक्त-अन्वयः-अननुभावकत्वम् आकाङ्क्षा। अर्थावाधो योग्यता। पदानाम् अविलम्वेन उच्चारणं सन्निधिः। आकाङ्क्षादिरहितं वाक्यम् अप्रमाणम्। यथा- "गौरश्वः पुरुषो हस्ती" इति न प्रमाणम्, आकाङ्क्षाविरहात्। 'अग्निना सिञ्चेत्' इति न प्रमाणम्, योग्यताविरहात्। प्रहरे प्रहरे असहोच्चारितानि "गाम् आनय" इत्यादि पदानि न प्रमाणम्, सान्निध्याभावात्।" इति। (तर्कसंग्रहः, पृष्ठम् 224)

XXIX. तर्कसंग्रहः, पृष्ठम् 225

Bibliography

- कांशीराम. (2007). *तर्कसंग्रहः.* दिल्ली: मोतीलाल बनारसीदास.
- गोस्वामी, श. च. (बङ्गाब्द 1390). *तर्कसंग्रहः.* कलिकाता: संस्कृत पुस्तक भाण्डार.
- न्यायाचार्य्यः, प. श. (1995). *तर्कसंग्रहः – न्यायबोधिनी सीता पद्माभ्यां-संस्कृत हिन्दी व्याख्याभ्यां समुद्भासिता, व्याख्याता-वेदान्तवागीश-साहित्यालङ्कारः.* काशी: सीता-साहित्य-सदनकाशी संस्थार्थम्-लहरी वुक् डिपो .
- पोद्दार, श. (1988). *तर्कसंग्रहः.* कलिकाता: व्यानार्जी पावलिशार्स.
- भट्टाचार्य, ड. स. (1996). *भारतीयदर्शन.* कलिकाता : वुक सिण्डिकेट प्राइभेट लिमिटेड.
- मण्डल, प. (1999). *भारतीयदर्शन.* कलिकाता: प्रग्रेसिभ पावलिशार्स.

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

- वागची, द. (2008). *तर्कसंग्रहः.* कलिकाता: प्रकाशक- मित्रम् 37 ए कलेज स्ट्रीट.
- *श्रीमदन्नम्भट्टविरचितः तर्कसंग्रहः, पं. गोवर्द्धनकृतन्यायबोधिनी, प. चन्द्रजसिंहकृत-पदकृत्यव्याख्यापेतः उपयुक्तविषमस्थलठिम्पणीयुतश्च ठक्कुरोपनामक पं. श्रीकनकलालशर्माना संस्कृतः, श्रीयुत 'द्विजेन्द्र' कविना संशोधितश्च* . (1930). कलिकाता: मास्टर खेलाड़ीलाल एण्ड सन.
- संस्कर्ता आचार्य-श्रीसीतारामशास्त्री, स. श. (1950). *तर्कसंग्रहः; न्यायबोधिनीपदकृत्य वालमनोरमा-परीक्षाटीकाऽलंकृतः, किञ्च भाषाटीकाकाविराजितः.* वाराणसी: भार्गव पुस्तकालयः.